
# antidote Indian remedies to global issues

## (SOLUTIONS TO CONTEMPORARY GLOBAL ISSUES - INDIAN CULTURE AND APPROACH)




Editor

**PRINCIPAL**


Shri Somnath Education Society

SMT. C.P. CHOKSI ARTS & SHREE P.L. CHOKSI COMMERCE COLLEGE, VERAVAL


Scanned by CamScanner

# ANTIDOTE INDIAN REMEDIES TO GLOBAL ISSUES

*(SOLUTIONS TO CONTEMPORARY GLOBAL ISSUES - INDIAN CULTURE AND APPROACH)*

© Editor - Prin. Dr. R. P. Mehta

©Co-editors - Dr. A. M. Chocha
- Dr.. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

**પ્રાપ્તિ સ્થાન :**
Shri Somnath Education Society
Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College,
Veraval.

**ISBN No. 978-93-86103-79-6**

**પ્રથમ આવૃત્તિ : ૨૦૧૭**

**કિંમત : ₹ ૩૫૦/—**

**Editor**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Printer & Publisher**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com

Scanned by CamScanner

# आतङ्कवादनिराकरणे वैदिकोपायाः

डॉ. शतुघ्नपाणिग्राही
वेदवेदाङ्गसङ्कायाध्यक्षः, श्री सोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरात।

मानवजीवनं सर्वेषु जीवेषु श्रेष्ठं महत्वपूर्णं च वर्तते। अस्मिन् जगति मानवानां समूहः एव समाजः इति कथ्यते । अतः मनुष्य एकः सामाजिकप्राणिः । समाजः न केवलं समूहः अपि तु मनुष्याणामन्तः सम्बन्धानां जटिलव्यवस्था औपचारिकसम्बन्धानाञ्च योगः अस्ति । समाजे व्यक्तिना सह व्यक्तेः, परिवारेण सह परिवारस्य, ग्रामेण साकं ग्रामस्य, देशेन सह अपरदेशस्य परस्परं सहायता दृश्यते। अस्मिन् एव समाजे जन्म लब्ध्वा शिशुः व्यवहारं परिज्ञाय सामाजिको भवति । समाजे निवसन्तः सर्वे जनाः स्वजीवने परमसुखं शान्तिं च प्राप्तुम् अभिलषन्ति। परन्तु आतङ्कवादः तत्र बाधा उत्पादयति।

अद्य सकलं जगत् आतङ्कवादसमस्यया आक्रान्तं वर्तते । कुत्रचित् विस्फोटः, कुत्रचित् अपहरणम्, कुत्रचित् हत्या, नरसंहारम्, धनापहरण्म् इत्यादयः वार्ताः दरीदृश्यन्ते । आतङ्कवादेन मानवीयमूल्यानाम् अवक्षयः भवति । वर्तमानसमये समाजे एतादृशी स्थितिर्वर्तते यत् नवजातशिशुरपि आतङ्कवादसमस्यया आक्रान्तो वर्तते । मानवः मानवस्य हननं करोति । प्रातः काले यदा वयं सम्वादपत्रिकादिषु दृष्टिं निपातयामः तदा चित्तं विषादग्रस्तं भवति। सर्वेषु क्षेत्रेषु लब्धप्रतिष्ठः आमेरिकादेशः यदा आतङ्कवादेन ग्रस्तोऽभूत्, विश्ववाणिजकेन्द्रं विनष्टं, तदा आतङ्कवादस्य वास्तवस्वरूपं सर्वैरनुभूतम् । अनन्तरं भारतस्य मुम्बईनगरस्थ ताजहोटलस्योपरि आक्रमणम्, पठानकोटोपरि आक्रमणम्, इदानीम् उरीस्थितसेनानामुपरि आक्रमणम्, भारतस्य कृते चिन्तायाः विषयः वर्तते। अतः वर्तमानसमयस्य राजनेतारः विद्वांसश्च कथयन्ति – आतङ्कवादीनां नास्ति कोऽपि धर्मः समाजश्च । एते समाजस्य कृते आततायिनः सन्ति। एतेषां कृते दया न कर्तव्या। एतेषां हननमेव आतङ्कवादसमस्यायाः निराकरणोपायः। परन्तु अनेन आतङ्कवादस्य मूलोत्पाटनम् असम्भवम्।

एतासां समस्यानां समाधानार्थं वैदिकोपायाः एव राजन्ते । वेदः भवति भारतीयसंस्कृतेः आत्मा। अस्मिन् वैदिकसाहित्ये संस्कृति- सभ्यता-सदाचार-विश्वबन्धुत्वभावनाश्च विराजते। तदुक्तं यथा-

वेदेषु संस्कृतिर्ज्ञेया वेदेषु विविधाः कलाः ।
वेदेषु ज्ञेयं विज्ञानं वेदेषु किन्न विद्यते ।।

अत्र प्रश्न आगच्छति आतङ्कवादः वैदिकयुगे आसीत् न वा ? वैदिकमन्त्राणामनुशीलनेन ज्ञायते वैदिकयुगेऽपि आतङ्कवादसमस्या आसीत् । परन्तु तत्र केवलं प्रजापतेः पुत्ररूपयोः देवताराक्षसयोर्मध्ये स्पर्धा भवति स्म ।[1] तत्रापि देवेषु राक्षसानामातङ्कः राक्षसेषु च देवानामातङ्कः सीमाबद्धः आसीत् । स्व स्व प्रतिष्ठार्थं युद्धं भवति स्म । अयं सामुदायिकातङ्कः । एतस्मिन् प्रसङ्गे शतपथब्राह्मणे आख्यायिकाः दृश्यन्ते ।[2] रामायणयुगे कामक्रोधादियुक्ताः रावणादयः राक्षसाः अपि आतङ्कं कुर्वन्ति स्म। एतेषामातङ्कं वैयक्तिकमातङ्कमासीत् । कंसस्यातङ्कः एकस्य ग्रामस्य परिवारस्य कृते वा आसीत् । ऐतिहासिकयुगे धर्मप्रतिष्ठार्थं जीविकानिर्वाहर्थं वा आर्याणामातङ्कः अनार्योपरि आसीत् । अग्रे मोगलशासकानां ब्रिटिशशासकानां चातङ्कः साम्राज्यं विस्तारितार्थमासीत् । परन्तु इदानीं यः आतङ्कवादः दृश्यते स एव आतङ्कवादः धर्ममाधारीकृत्य वर्तते इति प्रमाणं भवति यदा बांग्लादेशे आक्रमणे इस्लामिधर्मधारिजनान् विहाय अन्यधर्मधारिणां संहारः सञ्जातः । ते आतङ्कवादिनः अपि एतद् स्वीकृतवन्तः यत्

जाकिरमहोदयस्य प्रवचनेन वयं प्रोत्साहिता भूत्वा एतद् आतङ्कवादकार्यं सम्पादितवन्तः । शुक्रनीत्यनुसारेण इदानीन्तनाः आततायिनः सर्वदा हन्तव्याः। यतोहि वैदिककालात् आरभ्य महाभारतकालं यावत् आतङ्कवादस्य स्वरूपं भिन्नमासीत् । वर्तमानकाले ये आतङ्कवादिनः ते आततायिलक्षणयुक्ताः ।[3] अतः एते दर्शनमात्रेण हन्तव्याः । परन्तु अत्र प्रश्नः उदेति किं नाम धर्म ? हिन्दुधर्म-इस्लामिधर्म-इहुदिधर्म-बौधधर्म-जैनधर्मादि भेदेन धर्माः बहुविधाः वा ? सम्प्रदायो वा ? जायमाने प्रश्ने आचार्यजैमिनिः पूर्वपक्षमतोपस्थापनपूर्वकं प्रतिपादयति-

विचारविषयो धर्मो लक्षणेन विवर्जितः। मानेन वाऽथवोपेतस्ताभ्यामिति विचिन्त्यते ॥
लौकिकाकारहीनस्य तस्य किं नाम लक्षणम्। मानशङ्का तु दूरेऽत्र प्रत्यक्षाद्यप्रवर्तनात् ॥
चोदनागम्य आकारो ह्यर्थत्वे सति लक्षणम्। अत एव प्रमाणं च चोदनैवाऽत्र नो कुतः ॥[4] इति।

अत्र चोदना इति शब्दस्यार्थ भवति वेदः । अतः वेदप्रतिपादितः विषयः भवति धर्म । अत्र प्रश्नः आगच्छति वेदः किं प्रतिपादयति ? वेदः यज्ञसम्पादयितु प्रचोदयति। अतः कथ्यते यागादिरेव धर्मः।[5] यज्ञो वै श्रेष्ठतम कर्म ।[6] शुक्लयजुर्वेदे यज्ञः ब्रह्माण्डस्य केन्द्रबिन्दुः उद्गमस्थलमस्ति - 'अयं यज्ञो भुवनस्य नाभिः ।[7]' यज्ञकर्मणा उर्ज-अन्न प्राप्ति र्भवति ।[8] यागसम्पादनेन वृष्टिर्भवति ।[9] अत्र प्रश्नः उदेति किं वृष्टिः हिन्दुजनानां कृते भवति वा ? वृष्टेः जलं हिन्दुजनान् विहाय अन्य कोपि न स्वीकरोति वा ? वृष्टेरन्नं भवति तस्मात् प्रजाः जायन्ते । अन्नं प्रजानां धारणं करोति। अतः अथर्ववेदस्यापरनाम अन्नवेद इति कथ्यते।[10] यः धारयति स एव धर्मः ।[11] अत्राहं जिज्ञासाकर्तुमिच्छामि यत् धर्ममाधारिकृत्य जे जनाः आतङ्कवादं कुर्वन्ति ते धर्म किं जानन्ति वा ? अहिंसाचरणं जीवने परमं कर्तव्यम् । अत एवोच्यते "अहिंसा परमो धर्मः"[12] इति। पतञ्जलिना अपि उक्तम् – अहिंसासत्यमास्तेयं ब्रह्मचर्यापरिग्रहा यमाः [13] । वेदेषु प्रतिष्ठितं वर्तते अनेकतासु एकतायाः दर्शनम्, अतो हि सर्वभूतेषु आत्मीयभावं प्रदर्शयन् ऋषिः प्राहः-

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥
समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति ॥[14]

वैदिकसाहित्यं न केवलं कस्यचिदेकस्य वर्गस्य देशस्य वा जनानां कृते वर्तते । नैतिकतायाः जागरणे महत्वपूर्णं स्थानं निर्वहति वैदिकसाहित्यम् । सत्यस्य पालनं, मैत्रीभावः, सुमधुरव्यवहारः, त्यागमयजीवनं, अहिंसापूर्णजीवनम्, उपासनापूर्वकं प्रकृतेः भोगः इत्यादीनि नानाविधानि उपकारकाणि वचांसि वैदिकसाहित्ये प्राप्यन्ते यथा "तन्मे मनः शिवसङ्कल्पमस्तु",[15] "मित्रस्य चक्षुषा समीक्षामहे"[16], भद्रं कर्णेभिः शृणुयाम देवाः[17], माता भूमिः पुत्रोऽहं पृथिव्याः[18], सत्यं वद, धर्मं चर, अतिथिदेवो भव[19], तेनत्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम्[20], यद्वदामि मधुमत्तद् वदामि[21], यस्मिन् सर्वाणि भूतानात्मन्नेवानु पश्यति[22], इदमहमनृतात् सत्यमुपैमि[23] । अग्नौ मित्रेभ्यश्च अदत्वा स्वयमेव भुङ्क्ते यः सः केवलादी केवलाघो भवति[24] । सह नाववतु सह नौभुनक्तु सहवीर्यं करवावहै इति कठोपनिषद्वाक्यं परस्परसहावस्थानपूर्वकं मैत्रीभावस्य अभिवृद्धिद्वारा विद्वेषभावनारहिततया स्वकीयबलवीर्यादिवर्द्धयितुमुपदिशति । यदि एते गुणाः स्वीक्रियन्ते चेत् तर्हि आतङ्कस्य उत्पत्तिर्नैव भविष्यति। एतादृशैः वचनैः वैदिकसाहित्यं मानवतासंरक्षणार्थम् उपायं दर्शयति जनेभ्यः। आततायिजनेषु अपि एभिः सद्वचनैः दूरीभविष्यति तेषां दुष्टविचाराः। सद्विचाराः संस्काराः उपकारकाः भवन्ति आतङ्कवादनिराकरणे। देवोपासनेन जीवनं यापनीयं तेन कामक्रोधादयः शान्ताः भविष्यन्ति। मानवशरीरे एव देवराक्षसभावयोः समाना स्थितिर्विद्यते। यदा दैवगुणस्य आधिक्यं भवति तदा मानवः देवपदवाच्यो

Scanned by CamScanner

भवति। यदा आसुरगुणस्याधिक्यं भवति तदा स एव मानवः दानवो भवति। धृतिक्षमादयो गुणाः यदा अधिकाः भवन्ति तदा मानवः देवत्वं प्राप्नोति। अतः आतङ्कवादस्य गुणाः शरीरे एव सन्ति। शरीरस्य धारणं अन्नेन भवति। अतः वैदिकसाहित्ये अन्नस्य स्तुतिः ब्रह्मरूपेण भवति[25]। अतः सात्विकभोजनम् आतङ्कवादनिराकरणे महत्त्वपूर्णं स्थानं निर्वहति । पुनश्च ध्यानजपादीनामपि प्रभावः आतङ्कवादीनां मनसि पतति । यस्मिन् स्थाने ब्रह्मज्ञानं क्षात्रबलं च एकत्र भवति तत्स्थानं पूज्यं भवति । तत्र आतङ्कवादस्य प्रभावः लेशोऽपि न स्थास्यति।

निष्कर्षरूपेण वक्तुं शक्यते यत् भारतवर्षं धर्मनिरपेक्षराष्ट्रं ,वैदिकसाहित्यं हिन्दूनां धर्मग्रन्थ इति वा मत्वा स्वार्थान्वेषि राजनेतारः पाठ्यक्रमात् वैदिकग्रन्थान् निष्कासितवन्तः। निष्प्रयोजनं नैतिकताविहीनं विद्याभ्यासं कृत्वा बाल्यकालादेव जनाः आतङ्कवादेन,अनाचारेण, हिंसया, कपटेन, चौर्येण, लुण्ठनेन वा इदानीं धनोपार्जनं कुर्वन्ति। यदि आतङ्कवादस्य संम्पूर्णनिराकरणं कर्तुमिच्छामश्चेत् वैदिकोपायाः एव अवलम्बनीयाः । यत्रविश्वं भवत्येकनीडम् इति भावनया मानवसेवा ईश्वरसेवा इति विज्ञाय वैदिकसिद्धान्तानाभाचरणं कुर्मश्चेत् मानवसमाजस्य सुरक्षा अवश्यमेव भविष्यति तत्र नास्ति कापि शङ्का। ॐ आनो भद्रा क्रतवो यन्तु इति।

1 शतपथब्राह्मणम् - प्रथमकाण्डम्

2 शतपथब्राह्मणम् -

3 अग्निदो गरदश्चैव शस्त्रोन्मत्तो धनापहः।
क्षेत्रदारहरश्चैतान् षड्विद्यादाततायिनः॥ शुक्रनीतिः

4 जैमिनीयन्यायमाला – १/२

5 अर्थसंग्रहः - धर्मलक्षणप्रश्नः-४

6 शतपथब्राह्मणम्- १/७/१/५

7 शुक्ल.यजु.20.8.

8 इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। शुक्लयजुर्वेदः - १/१

9 अग्नौ प्रास्ताहुतिः सम्यगादित्य मुपतिष्ठति।
आदित्याद् जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः॥ मनुस्मृतिः - 3/66

10 अन्नो वै अथर्वः - अथर्ववेदः सायणभाष्यम्

11 धारणात् धर्म इत्याहुः धर्मो धारयति प्रजाः।
यः स्यात् धारणसंयुक्तः स धर्म इति निश्चयः॥ महाभारतम् -

12 महाभारतवनपर्व- २०७/४, श्रीमद्भगवगीता-

13 पातञ्जलियोगसूत्रम् -

14 ऋग्वेदः - १०/१९१/३-४

15 शुक्लयजुर्वेदः ३४-१-६

16 यजुर्वेदः ३६/१८

17 यजुर्वेदः २५/२१

18 अथर्ववेदः १२/१/१२

19 तैत्तिरीयोपनिषद् -

20 ईशावास्योपनिषद् – १/

21 अथर्ववेदः १२/१/४८

22 ईशावास्योपनिषद् – १/

23 शुक्लयजुर्वेदः- १/५

24 मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी॥ ऋग्वेदः - १०/११७/६

25 अन्नो वै ब्रह्मः - शुक्लयजुर्वेदः-षोडशोऽध्यायः

Scanned by CamScanner